"इमानि कुण्डानि कादिग्रन्थविरुद्धानीत्यनादरणीयानि। तानि वचनानि तु तदाकारत्वमात्रसम्पादकानि न क्षेत्रफलपूर्त्तिकराणि तत्र भित्र्यक्षेशोभा भूदिति स्थूलमार्गेण योन्याद्याकारमात्रं प्रतिपाद्यते। योगिनामभिज्ञस्तेन चतुरस्रखण्डं तण्डुलादिना पूरयित्वा तानेव तण्डुलान् योन्यादिकुण्डे धृत्वा तत्पूर्त्तौ तोष्टव्यमिति। अङ्गुलयवयूकालिक्षाः कृत्वा गोमूत्रिकारीत्या गणयित्वा अष्टभिर्भागे गृहीते फले उपर्य्युपरि च योज्यमाने फलाद्युत्पद्यते अंशसवर्णनादि कुण्डमात्रेष्विति ज्ञेयम्। वृत्तार्द्धकुण्डमाह "स्वशतांशयुतेषुभागहीन स्वकरित्रीमितकर्कटेन मध्यात्। कृतवृत्तदलेऽप्यतस्य जीवां विदधातीन्दुदलस्य साधु सिद्ध्यै"। स्वीयशतांशेन युतोय इषुभागः पञ्चमांशः अर्थात् क्षेत्रस्यैव, तेन हीना चासौ स्वभूमिः क्षेत्रत्रिमितेन कर्कटेन सूत्रेण वा मध्याङ्कात् कृतं यद्वृत्तार्द्धं तस्मिन्पूर्व्वापरां रेखाञ्जीवारूपां वृत्तार्द्धस्य सिद्ध्यै साधु स्याद्यथा, तथा करोति विद्वानिति व्याख्या। अत्र क्षेत्रफलम् क्षेत्रस्य पञ्चांशोऽङ्गुलाद्यः ४ । ६ । २ । १ । ५ । तस्य शतांशोऽङ्गुलाद्यः ०।०। २ । ० । ४ । अनेनान्वितः पञ्चांशः ४ । ६ । ६ । २ । १ अनेनोना क्षेत्रभूमिः १९ । १ । १ । ५ । ७ एतद्व्यासार्द्धं द्विगुणं व्यासः ३८ । २।३।३।६। अत्रापि व्यासस्य वर्गः १४४४ । ५ । २ । ५ । ४ । भनवाग्निनिघ्ने ३९२७ । पञ्चसहस्रभक्ते इत्यादि रीत्या क्षेत्रफलम् ११५२ । २ । २ । ६ । २ । एतद्वृत्तस्य फलम् अस्यार्द्धं वृत्तार्द्धक्षेत्रफलम् ५७६ । १।३ । १ अत्रापि ध्वजायसिद्धिः। अथ त्र्यस्रिवृत्तकुण्डमाह "वक्त्राग्रं पुरतोनिधाय च पुनः कोणद्वयेस्वतुर्थांशकचिह्नेषु त्रिषु सूत्रदानतइदं स्यात्त्र्यस्रि कष्टोज्झितम्। विश्वांशैः स्वजिनांशकेन सहितैः क्षेत्रे जिनांशे कृते व्यासार्द्धेन मितेन मण्डलमिदं स्याद्वृत्तसंज्ञं शुभम्" अत्र पूर्व्वार्द्धोक्तं कुण्डं व्याख्यायते क्षेत्रस्य तृतीयांशम्पूर्व्वतोनिधाय ततउभयकोणद्वयेस्वतुर्थांशं निधाय दक्षिणत उत्तरतश्च दत्त्वा त्रिचिह्नेषु सूत्रदानात् कष्टरहितं त्र्यस्रि जायते इति तृतीयांशोऽष्टाङ्गुलानि मध्यसूत्रे योजितानि जातोलम्बः पश्चिमभुज उभतश्चतुर्थांशः षडङ्गुलानि योजितानि जातानि भूः २६ अत्र मुखाभावात् भूमेरर्द्धं कृतम् १८ इदं लम्बेनानेन निघ्नञ्जातं अत्र क्षेत्रफलम् ५७६ समभुजे क्षेत्रफलञ्च सिद्ध्यतीति कष्टोज्झितमित्युक्तम्

किञ्चिद्भुजवैषम्यं न दोषाय तत्रापि ध्वजाय एवेति। अथोत्तरार्द्धेन वृत्तमाह क्षेत्रे चतुर्व्विंशतिभक्ते सति त्रयोदशांशैः सह चतुर्व्विंशत्यंशयुतैः मितेन व्यासार्द्धेन मण्डलं यद्वृत्तं तत् वृत्तसंज्ञं कुण्डं सुन्दरं स्यात्। अथ क्षेत्रफलानयनम् अत्र त्रयोदशानाञ्चतुर्व्विंशांशोऽङ्गुलाद्यः०४ । २ । ५ । ३ । अनेन युतास्त्रयोदश १३ । ४।२ । ५ । २ । इदं व्यासार्द्धमेतद्द्विगुणं व्यासः २७ । ० । ५ । २ । ४ अत्र व्यासस्य वर्गोऽस्मिन् ७२९ । ० ।३। १। २ भनवाग्निनिघ्ने० पञ्चसहस्रभक्ते इत्यादिना क्षेत्रफलम् ५७६ ।०।६।०। अत्रापि ध्वजाय एवेति। अथ षडस्रमाह "भक्ते क्षेत्रे जिनांशैर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तैर्व्यासार्द्धं मण्डले तन्मितधृतगुणके कर्कटे सेन्दुदिक्कैः। षट्चिह्नेषु प्रदद्यादसमितगुणकानेकमेकन्तु हित्वा नाशे सन्ध्यंशदोषामपि च धृतिकृते नेत्ररम्यं षडस्रम्"। क्षेत्रे चतुर्व्विंशतिधा विभक्ते सति अष्टादशांशैः स्वद्वासप्ततितमांशयुक्तैस्तावता व्यासार्द्धेन वृत्ते कृते सति तेनैव व्यासार्द्धेन मिते गुणके सूत्रे सति कर्कटे वा उत्तरदिक्को धृते सति परावर्त्तनेन षट्चिह्नानि भवन्ति तेषु षट्सु चिह्नेषु षट् सूत्राणि एकान्तरेण परस्परलग्नानि दद्यात् ततः सन्धौ ये अङ्गदोषाः षड्भुजास्तेषां नाशेधृतिकृते मण्डलस्य विनाशे षडस्रं रमणीयञ्जायत इति व्याख्या अस्मिन् षडस्रे व्यासः २६ । ४ । ० अत्रोत्तराग्रं त्रिकोणमेकं महत् तद्भुजमानं त्रिद्व्यङ्काग्निनभश्चन्द्रैर्हतव्यासे समाहते। खखखाभ्राक्र्क१२००००संभक्ते लभ्यन्ते क्रमशोभुजाः" इति त्रयाणां भुजानां मानं २१ । ४।३।० उत्तराग्रात् पूर्व्वापरभुजमध्यं यावन्नीयमानं सूत्रं, लब्धश्चतुर्थांशोव्यासएव २७।६।० भुजाः, एवं भूः मुखाभावाद्भूम्यर्द्धं १५।६।३।४ लम्बेन निघ्नमित्यादिना जातं क्षेत्रफलं ४३२।५।२ अथास्य महतस्त्रिभुजस्य त्रिष्वपि भुजेषु त्रीणि त्र्यस्राणि समान्येव लग्नानि भवन्ति तत्रैकस्य फलमानीय त्रिगुणं कृत्वा पूर्व्वफले योजितं सत् पूर्णं क्षेत्रफलं स्यात्। तत्र दक्षिणकोणाग्रात् पूर्व्वापरभुजमध्यंनीयमानं सूत्रं लम्बः ८।१।० अयं व्यासचतुर्थांशः भुजत्र्यंशोभूमिः १०।४।२।३ सर्व्वत्र त्र्यस्र एव भुजसम्पातात् अत्र मुखाभावाद्भूमेरर्द्धं ५।२।१।१। इदं लम्बेन गुणितं क्षेत्रफलं ४८।०।४।२।१ जातं इदं त्रिगुणं त्र्यस्राणामपि फलं १४४।१।४।६ ।३। इदं पूर्व्वक्षेत्रफलेऽस्मिन् ४३२।५।२ योजितं ५७६।७।१।४।६। इदमपि किञ्चिदधिकमेवाधिक्यं